# Shri Parvati Sahasranama Stotram

# શ્રીપાર્વતીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Parvati Sahasranama Stotra from KurmapuraaNa

File name : pArvatIsahasranAmastotram.itx

Category : sahasranAma, devii, pArvatI, stotra, devI

Location : doc_devii

Transliterated by : Kirk Wortman" <kirkwort at hotmail.com>

Proofread by : Kirk Wortman" <kirkwort at hotmail.com>

Description-comments : Kurmapurana, Bhagavati Stuti Manjari p329, Slightly different from durgAsahasranAmastotram from Skandapurana

Latest update : August 13, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીપાર્વતીસહસ્રનામસ્તોત્રમ્

(દુર્ગાસહસ્રનામસ્તોત્રમિતિ સ્કાન્દે ક્વચિત્કચિદ્ભિન્નમ્ ।)

હિમવાનુવાચ ।

કા ત્વં દેવિ વિશાલાક્ષિ શશાઙ્કાવયવાઙ્કિતે ।
ન જાને ત્વામહં વત્સે યથાવદ્ બ્રૂહિ પૃચ્છતે ॥ ૧॥

ગિરીન્દ્રવચનં શ્રુત્વા તતઃ સા પરમેશ્વરી ।
વ્યાજહાર મહાશૈલં યોગિનામભયપ્રદા ॥ ૨॥

દેવ્યુવાચ ।

માં વિદ્ધિ પરમાં શક્તિં પરમેશ્વરસમાશ્રયામ્ ।
અનન્યામવ્યયામેકાં યાં પશ્યન્તિ મુમુક્ષવઃ ॥ ૩॥

અહં વૈ સર્વભાવાનામાત્મા સર્વાન્તરા શિવા ।
શાશ્વતૈશ્વર્યવિજ્ઞાનમૂર્તિઃ સર્વપ્રવર્તિકા ॥ ૪॥

અનન્તાઽનન્તમહિમા સંસારાર્ણવતારિણી ।
દિવ્યં દદામિ તે ચક્ષુઃ પશ્ય મે રૂપમૈશ્વરમ્ ॥ ૫॥

એતાવદુક્ત્વા વિજ્ઞાનં દત્ત્વા હિમવતે સ્વયમ્ ।
સ્વં રૂપં દર્શયામાસ દિવ્યં તત્ પારમેશ્વરમ્ ॥ ૬॥

કોટિસૂર્યપ્રતીકાશં તેજોબિમ્બં નિરાકુલમ્ ।
જ્વાલામાલાસહસ્રાઢ્યં કાલાનલશતોપમમ્ ॥ ૭॥

દંષ્ટ્રાકરાલં દુર્ધર્ષં જટામણ્ડલમણ્ડિતમ્ ।
ત્રિશૂલવરહસ્તં ચ ઘોરરૂપં ભયાનકમ્ ॥ ૮॥

પ્રશાન્તં સૌમ્યવદનમનન્તાશ્ચર્યસંયુતમ્ ।
ચન્દ્રાવયવલક્ષ્માણં ચન્દ્રકોટિસમપ્રભમ્ ॥ ૯॥

કિરીટિનં ગદાહસ્તં નૂપુરૈરુપશોભિતમ્ ।

દિવ્યમાલ્યામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ॥ ૧૦॥

શઙ્ખચક્રધરં કામ્યં ત્રિનેત્રં કૃત્તિવાસસમ્ ।
અણ્ડસ્થં ચાણ્ડબાહ્યસ્થં બાહ્યમાભ્યન્તરં પરમ્ ॥ ૧૧॥

સર્વશક્તિમયં શુભ્રં સર્વાકારં સનાતનમ્ ।
બ્રહ્મેન્દ્રોપેન્દ્રયોગીન્દ્રૈર્વન્દ્યમાનપદામ્બુજમ્ ॥ ૧૨॥

સર્વતઃ પાણિપાદાન્તં સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વમાવૃત્ય તિષ્ઠન્તં દદર્શ પરમેશ્વરમ્ ॥ ૧૩॥

દૃષ્ટ્વા તદીદૃશં રૂપં દેવ્યા માહેશ્વરં પરમ્ ।
ભયેન ચ સમાવિષ્ટઃ સ રાજા હૃષ્ટમાનસઃ ॥ ૧૪॥

આત્મન્યાધાય ચાત્માનમોઙ્કારં સમનુસ્મરન્ ।
નામ્નામષ્ટસહસ્રેણ તુષ્ટાવ પરમેશ્વરીમ્ ॥ ૧૫॥

હિમવાનુવાચ ।
ૐ શિવોમા પરમા શક્તિરનન્તા નિષ્કલાઽમલા ।
શાન્તા માહેશ્વરી નિત્યા શાશ્વતી પરમાક્ષરા ॥ ૧॥

અચિન્ત્યા કેવલાઽનન્ત્યા શિવાત્મા પરમાત્મિકા ।
અનાદિરવ્યયા શુદ્ધા દેવાત્મા સર્વગાઽચલા ॥ ૨॥

એકાનેકવિભાગસ્થા માયાતીતા સુનિર્મલા ।
મહામાહેશ્વરી સત્યા મહાદેવી નિરઞ્જના ॥ ૩॥

કાષ્ઠા સર્વાન્તરસ્થા ચ ચિચ્છક્તિરતિલાલસા ।
નન્દા સર્વાત્મિકા વિદ્યા જ્યોતીરૂપાઽમૃતાક્ષરા ॥ ૪॥

શાન્તિઃ પ્રતિષ્ઠા સર્વેષાં નિવૃત્તિરમૃતપ્રદા ।
વ્યોમમૂર્તિર્વ્યોમલયા વ્યોમાધારાઽચ્યુતાઽમરા ॥ ૫॥

અનાદિનિધનાઽમોઘા કારણાત્મા કલાઽકલા ।
ક્રતુઃ પ્રથમજા નાભિરમૃતસ્યાત્મસંશ્રયા ॥ ૬॥

પ્રાણેશ્વરપ્રિયા માતા મહામહિષઘાતિની ।
પ્રાણેશ્વરી પ્રાણરૂપા પ્રધાનપુરુષેશ્વરી ॥ ૭॥

સર્વશક્તિકલાકારા જ્યોત્સ્ના દ્યૌર્મહિમાસ્પદા ।
સર્વકાર્યનિયન્ત્રી ચ સર્વભૂતેશ્વરેશ્વરી ॥ ૮॥

અનાદિરવ્યક્તગુહા મહાનન્દા સનાતની ।
આકાશયોનિર્યોગસ્થા મહાયોગેશ્વરેશ્વરી ॥ ૯॥

મહામાયા સુદુષ્પૂરા મૂલપ્રકૃતિરીશ્વરી ।
સંસારયોનિઃ સકલા સર્વશક્તિસમુદ્ભવા ॥ ૧૦॥

સંસારપારા દુર્વારા દુર્નિરીક્ષ્યા દુરાસદા ।
પ્રાણશક્તિઃ પ્રાણવિદ્યા યોગિની પરમા કલા ॥ ૧૧॥

મહાવિભૂતિર્દુર્ધર્ષા મૂલપ્રકૃતિસંભવા ।
અનાદ્યનન્તવિભવા પરાર્થા પુરુષારણિઃ ॥ ૧૨॥

સર્ગસ્થિત્યન્તકરણી સુદુર્વાચ્યા દુરત્યયા ।
શબ્દયોનિઃ શબ્દમયી નાદાખ્યા નાદવિગ્રહા ॥ ૧૩॥

પ્રધાનપુરુષાતીતા પ્રધાનપુરુષાત્મિકા ।
પુરાણી ચિન્મયી પુંસામાદિઃ પુરુષરૂપિણી ॥ ૧૪॥

ભૂતાન્તરાત્મા કૂટસ્થા મહાપુરુષસંજ્ઞિતા ।
જન્મમૃત્યુજરાતીતા સર્વશક્તિસમન્વિતા ॥ ૧૫॥

વ્યાપિની ચાનવચ્છિન્ના પ્રધાનાનુપ્રવેશિની ।
ક્ષેત્રજ્ઞશક્તિરવ્યક્તલક્ષણા મૂલવર્જિતા ॥ ૧૬॥

અનાદિમાયાસંભિન્ના ત્રિતત્ત્વા પ્રકૃતિર્ગુહા ।
મહામાયાસમુત્પન્ના તામસી પૌરુષી ધ્રુવા ॥ ૧૭॥

વ્યક્તાવ્યક્તાત્મિકા કૃષ્ણા રક્તા શુક્લા પ્રસૂતિકા ।
અકાર્યા કાર્યજનની નિત્યં પ્રસવધર્મિણી ॥ ૧૮॥

સર્ગપ્રલયનિર્મુક્તા સૃષ્ટિસ્થિત્યન્તધર્મિણી ।
બ્રહ્મગર્ભા ચતુર્વિંશા પદ્મનાભાઽચ્યુતાત્મિકા ॥ ૧૯॥

વૈદ્યુતી શાશ્વતી યોનિર્જગન્માતેશ્વરપ્રિયા ।
સર્વાધારા મહારૂપા સર્વૈશ્વર્યસમન્વિતા ॥ ૨૦॥

વિશ્વરૂપા મહાગર્ભા વિશ્વેશેચ્છાનુવર્તિની ।
મહીયસી બ્રહ્મયોનિર્મહાલક્ષ્મીસમુદ્ભવા ॥ ૨૧॥

મહાવિમાનમધ્યસ્થા મહાનિદ્રાત્મહેતુકા ।

સર્વસાધારણી સૂક્ષ્મા હ્યવિદ્યા પારમાર્થિકા ॥ ૨૨॥

અનન્તરૂપાઽનન્તસ્થા દેવી પુરુષમોહિની ।
અનેકાકારસંસ્થાના કાલત્રયવિવર્જિતા ॥ ૨૩॥

બ્રહ્મજન્મા હરેર્મૂર્તિર્બ્રહ્મવિષ્ણુશિવાત્મિકા ।
બ્રહ્મેશવિષ્ણુજનની બ્રહ્માખ્યા બ્રહ્મસંશ્રયા ॥ ૨૪॥

વ્યક્તા પ્રથમજા બ્રાહ્મી મહતી જ્ઞાનરૂપિણી ।
વૈરાગ્યૈશ્વર્યધર્માત્મા બ્રહ્મમૂર્તિર્હૃદિસ્થિતા ।
અપાંયોનિઃ સ્વયંભૂતિર્માનસી તત્ત્વસંભવા ॥ ૨૫॥

ઈશ્વરાણી ચ શર્વાણી શંકરાર્ધશરીરિણી ।
ભવાની ચૈવ રુદ્રાણી મહાલક્ષ્મીરથામ્બિકા ॥ ૨૬॥

મહેશ્વરસમુત્પન્ના ભુક્તિમુક્તિફલપ્રદા ।
સર્વેશ્વરી સર્વવન્દ્યા નિત્યં મુદિતમાનસા ॥ ૨૭॥

બ્રહ્મેન્દ્રોપેન્દ્રનમિતા શંકરેચ્છાનુવર્તિની ।
ઈશ્વરાર્ધાસનગતા મહેશ્વરપતિવ્રતા ॥ ૨૮॥

સકૃદ્વિભાવિતા સર્વા સમુદ્રપરિશોષિણી ।
પાર્વતી હિમવત્પુત્રી પરમાનન્દદાયિની ॥ ૨૯॥

ગુણાઢ્યા યોગજા યોગ્યા જ્ઞાનમૂર્તિર્વિકાસિની ।
સાવિત્રી કમલા લક્ષ્મીઃ શ્રીરનન્તોરસિ સ્થિતા ॥ ૩૦॥

સરોજનિલયા મુદ્રા યોગનિદ્રા સુરાર્દિની ।
સરસ્વતી સર્વવિદ્યા જગજ્જ્યેષ્ઠા સુમઙ્ગલા ॥ ૩૧॥

વાગ્દેવી વરદા વાચ્યા કીર્તિઃ સર્વાર્થસાધિકા ।
યોગીશ્વરી બ્રહ્મવિદ્યા મહાવિદ્યા સુશોભના ॥ ૩૨॥

ગુહ્યવિદ્યાત્મવિદ્યા ચ ધર્મવિદ્યાત્મભાવિતા ।
સ્વાહા વિશ્વંભરા સિદ્ધિઃ સ્વધા મેધા ધૃતિઃ શ્રુતિઃ ॥ ૩૩॥

નીતિઃ સુનીતિઃ સુકૃતિર્માધવી નરવાહિની ।
અજા વિભાવરી સૌમ્યા ભોગિની ભોગદાયિની ॥ ૩૪॥

શોભા વંશકરી લોલા માલિની પરમેષ્ઠિની ।
ત્રૈલોક્યસુન્દરી રમ્યા સુન્દરી કામચારિણી ॥ ૩૫॥

મહાનુભાવા સત્ત્વસ્થા મહામહિષમર્દની ।
પદ્મમાલા પાપહરા વિચિત્રા મુકુટાનના ॥ ૩૬॥

કાન્તા ચિત્રામ્બરધરા દિવ્યાભરણભૂષિતા ।
હંસાખ્યા વ્યોમનિલયા જગત્સૃષ્ટિવિવર્ધિની ॥ ૩૭॥

નિર્યન્ત્રા યન્ત્રવાહસ્થા નન્દિની ભદ્રકાલિકા ।
આદિત્યવર્ણા કૌમારી મયૂરવરવાહિની ॥ ૩૮॥

વૃષાસનગતા ગૌરી મહાકાલી સુરાર્ચિતા ।
અદિતિર્નિયતા રૌદ્રી પદ્મગર્ભા વિવાહના ॥ ૩૯॥

વિરૂપાક્ષી લેલિહાના મહાપુરનિવાસિની ।
મહાફલાઽનવદ્યાઙ્ગી કામપૂરા વિભાવરી ॥ ૪૦॥

વિચિત્રરત્નમુકુટા પ્રણતાર્તિપ્રભઞ્જની ।
કૌશિકી કર્ષણી રાત્રિસ્ત્રિદશાર્ત્તિવિનાશિની ॥ ૪૧॥

બહુરૂપા સુરૂપા ચ વિરૂપા રૂપવર્જિતા ।
ભક્તાર્તિશમની ભવ્યા ભવભાવવિનાશિની ॥ ૪૨॥

નિર્ગુણા નિત્યવિભવા નિઃસારા નિરપત્રપા ।
યશસ્વિની સામગીતિર્ભવાઙ્ગનિલયાલયા ॥ ૪૩॥

દીક્ષા વિદ્યાધરી દીપ્તા મહેન્દ્રવિનિપાતિની ।
સર્વાતિશાયિની વિદ્યા સર્વસિદ્ધિપ્રદાયિની ॥ ૪૪॥

સર્વેશ્વરપ્રિયા તાર્ક્ષ્યા સમુદ્રાન્તરવાસિની ।
અકલઙ્કા નિરાધારા નિત્યસિદ્ધા નિરામયા ॥ ૪૫॥

કામધેનુર્બૃહદ્ગર્ભા ધીમતી મોહનાશિની ।
નિઃસઙ્કલ્પા નિરાતઙ્કા વિનયા વિનયપ્રદા ॥ ૪૬॥

જ્વાલામાલા સહસ્રાઢ્યા દેવદેવી મનોન્મની ।
મહાભગવતી દુર્ગા વાસુદેવસમુદ્ભવા ॥ ૪૭॥

મહેન્દ્રોપેન્દ્રભગિની ભક્તિગમ્યા પરાવરા ।
જ્ઞાનજ્ઞેયા જરાતીતા વેદાન્તવિષયા ગતિઃ ॥ ૪૮॥

દક્ષિણા દહના દાહ્યા સર્વભૂતનમસ્કૃતા ।

યોગમાયા વિભાવજ્ઞા મહામાયા મહીયસી ॥ ૪૯॥

સંધ્યા સર્વસમુદ્ભૂતિર્બ્રહ્મવૃક્ષાશ્રયાનતિઃ ।
બીજાઙ્કુરસમુદ્ભૂતિર્મહાશક્તિર્મહામતિઃ ॥ ૫૦॥

ખ્યાતિઃ પ્રજ્ઞા ચિતિઃ સંવિત્ મહાભોગીન્દ્રશાયિની ।
વિકૃતિઃ શાંકરી શાસ્ત્રી ગણગન્ધર્વસેવિતા ॥ ૫૧॥

વૈશ્વાનરી મહાશાલા દેવસેના ગુહપ્રિયા ।
મહારાત્રિઃ શિવાનન્દા શચી દુઃસ્વપ્નનાશિની ॥ ૫૨॥

ઇજ્યા પૂજ્યા જગદ્ધાત્રી દુર્વિજ્ઞેયા સુરૂપિણી ।
ગુહામ્બિકા ગુણોત્પત્તિર્મહાપીઠા મરુત્સુતા ॥ ૫૩॥

હવ્યવાહાન્તર્યાગાદિઃ હવ્યવાહસમુદ્ભવા ।
જગદ્યોનિર્જગન્માતા જન્મમૃત્યુજરાતિગા ॥ ૫૪॥

બુદ્ધિમાતા બુદ્ધિમતી પુરુષાન્તરવાસિની ।
તરસ્વિની સમાધિસ્થા ત્રિનેત્રા દિવિ સંસ્થિતા ॥ ૫૫॥

સર્વેન્દ્રિયમનોમાતા સર્વભૂતહૃદિ સ્થિતા ।
સંસારતારિણી વિદ્યા બ્રહ્મવાદિમનોલયા ॥ ૫૬॥

બ્રહ્માણી બૃહતી બ્રાહ્મી બ્રહ્મભૂતા ભવારણિઃ ।
હિરણ્મયી મહારાત્રિઃ સંસારપરિવર્ત્તિકા ॥ ૫૭॥

સુમાલિની સુરૂપા ચ ભાવિની તારિણી પ્રભા ।
ઉન્મીલની સર્વસહા સર્વપ્રત્યયસાક્ષિણી ॥ ૫૮॥

સુસૌમ્યા ચન્દ્રવદના તાણ્ડવાસક્તમાનસા ।
સત્ત્વશુદ્ધિકરી શુદ્ધિર્મલત્રયવિનાશિની ॥ ૫૯॥

જગત્પ્રિયા જગન્મૂર્તિસ્ત્રિમૂર્તિરમૃતાશ્રયા ।
નિરાશ્રયા નિરાહારા નિરઙ્કુરવનોદ્ભવા ॥ ૬૦॥

ચન્દ્રહસ્તા વિચિત્રાઙ્ગી સ્રગ્વિણી પદ્મધારિણી ।
પરાવરવિધાનજ્ઞા મહાપુરુષપૂર્વજા ॥ ૬૧॥

વિદ્યેશ્વરપ્રિયા વિદ્યા વિદ્યુજ્જિહ્વા જિતશ્રમા ।
વિદ્યામયી સહસ્રાક્ષી સહસ્રવદનાત્મજા ॥ ૬૨॥

સહસ્રરશ્મિઃ સત્ત્વસ્થા મહેશ્વરપદાશ્રયા ।
ક્ષાલિની સન્મયી વ્યાપ્તા તૈજસી પદ્મબોધિકા ॥ ૬૩॥

મહામાયાશ્રયા માન્યા મહાદેવમનોરમા ।
વ્યોમલક્ષ્મીઃ સિંહરથા ચેકિતાનાઽમિતપ્રભા ॥ ૬૪॥

વીરેશ્વરી વિમાનસ્થા વિશોકા શોકનાશિની ।
અનાહતા કુણ્ડલિની નલિની પદ્મવાસિની ॥ ૬૫॥

સદાનન્દા સદાકીર્તિઃ સર્વભૂતાશ્રયસ્થિતા ।
વાગ્દેવતા બ્રહ્મકલા કલાતીતા કલારણિઃ ॥ ૬૬॥

બ્રહ્મશ્રીર્બ્રહ્મહૃદયા બ્રહ્મવિષ્ણુશિવપ્રિયા ।
વ્યોમશક્તિઃ ક્રિયાશક્તિર્જ્ઞાનશક્તિઃ પરાગતિઃ ॥ ૬૭॥

ક્ષોભિકા બન્ધિકા ભેદ્યા ભેદાભેદવિવર્જિતા ।
અભિન્નાભિન્નસંસ્થાના વંશિની વંશહારિણી ॥ ૬૮॥

ગુહ્યશક્તિર્ગુણાતીતા સર્વદા સર્વતોમુખી ।
ભગિની ભગવત્પત્ની સકલા કાલકારિણી ॥ ૬૯॥

સર્વવિત્ સર્વતોભદ્રા ગુહ્યાતીતા ગુહારણિઃ ।
પ્રક્રિયા યોગમાતા ચ ગઙ્ગા વિશ્વેશ્વરેશ્વરી ॥ ૭૦॥

કપિલા કાપિલા કાન્તા કનકાભા કલાન્તરા ।
પુણ્યા પુષ્કરિણી ભોક્ત્રી પુરંદરપુરસ્સરા ॥ ૭૧॥

પોષણી પરમૈશ્વર્યભૂતિદા ભૂતિભૂષણા ।
પઞ્ચબ્રહ્મસમુત્પત્તિઃ પરમાર્થાર્થવિગ્રહા ॥ ૭૨॥

ધર્મોદયા ભાનુમતી યોગિજ્ઞેયા મનોજવા ।
મનોહરા મનોરક્ષા તાપસી વેદરૂપિણી ॥ ૭૩॥

વેદશક્તિર્વેદમાતા વેદવિદ્યાપ્રકાશિની ।
યોગેશ્વરેશ્વરી માતા મહાશક્તિર્મનોમયી ॥ ૭૪॥

વિશ્વાવસ્થા વિયન્મૂર્તિર્વિદ્યુન્માલા વિહાયસી ।
કિન્નરી સુરભી વન્દ્યા નન્દિની નન્દિવલ્લભા ॥ ૭૫॥

ભારતી પરમાનન્દા પરાપરવિભેદિકા ।
સર્વપ્રહરણોપેતા કામ્યા કામેશ્વરેશ્વરી ॥ ૭૬॥

અચિન્ત્યાઽચિન્ત્યવિભવા હૃલ્લેખા કનકપ્રભા ।
કૂષ્માણ્ડી ધનરત્નાઢ્યા સુગન્ધા ગન્ધદાયિની ॥ ૭૭॥

ત્રિવિક્રમપદોદ્ભૂતા ધનુષ્પાણિઃ શિવોદયા ।
સુદુર્લભા ધનાધ્યક્ષા ધન્યા પિઙ્ગલલોચના ॥ ૭૮॥

શાન્તિઃ પ્રભાવતી દીપ્તિઃ પઙ્કજાયતલોચના ।
આદ્યા હૃત્કમલોદ્ભૂતા ગવાં માતા રણપ્રિયા ॥ ૭૯॥

સત્ક્રિયા ગિરિજા શુદ્ધા નિત્યપુષ્ટા નિરન્તરા ।
દુર્ગાકાત્યાયની ચણ્ડી ચર્ચિકા શાન્તવિગ્રહા ॥ ૮૦॥

હિરણ્યવર્ણા રજની જગદ્યન્ત્રપ્રવર્તિકા ।
મન્દરાદ્રિનિવાસા ચ શારદા સ્વર્ણમાલિની ॥ ૮૧॥

રત્નમાલા રત્નગર્ભા પૃથ્વી વિશ્વપ્રમાથિની ।
પદ્માનના પદ્મનિભા નિત્યતુષ્ટાઽમૃતોદ્ભવા ॥ ૮૨॥

ધુન્વતી દુઃપ્રકમ્પ્યા ચ સૂર્યમાતા દૃષદ્વતી ।
મહેન્દ્રભગિની માન્યા વરેણ્યા વરદર્પિતા ॥ ૮૩॥

કલ્યાણી કમલા રામા પઞ્ચભૂતા વરપ્રદા ।
વાચ્યા વરેશ્વરી વન્દ્યા દુર્જયા દુરતિક્રમા ॥ ૮૪॥

કાલરાત્રિર્મહાવેગા વીરભદ્રપ્રિયા હિતા ।
ભદ્રકાલી જગન્માતા ભક્તાનાં ભદ્રદાયિની ॥ ૮૫॥

કરાલા પિઙ્ગલાકારા નામભેદાઽમહામદા ।
યશસ્વિની યશોદા ચ ષડધ્વપરિવર્ત્તિકા ॥ ૮૬॥

શઙ્ખિની પદ્મિની સાંખ્યા સાંખ્યયોગપ્રવર્તિકા ।
ચૈત્રા સંવત્સરારૂઢા જગત્સંપૂરણીન્દ્રજા ॥ ૮૭॥

શુમ્ભારિઃ ખેચરી સ્વસ્થા કમ્બુગ્રીવા કલિપ્રિયા ।
ખગધ્વજા ખગારૂઢા પરાર્ધ્યા પરમાલિની ॥ ૮૮॥

ઐશ્વર્યવર્ત્મનિલયા વિરક્તા ગરુડાસના ।
જયન્તી હૃદ્ગુહા રમ્યા ગહ્વરેષ્ઠા ગણાગ્રણીઃ ॥ ૮૯॥

સંકલ્પસિદ્ધા સામ્યસ્થા સર્વવિજ્ઞાનદાયિની ।

કલિકલ્મષહન્ત્રી ચ ગુહ્યોપનિષદુત્તમા ॥ ૯૦॥

નિષ્ઠા દૃષ્ટિઃ સ્મૃતિર્વ્યાપ્તિઃ પુષ્ટિસ્તુષ્ટિઃ ક્રિયાવતી ।
વિશ્વામરેશ્વરેશાના ભુક્તિર્મુક્તિઃ શિવાઽમૃતા ॥ ૯૧॥

લોહિતા સર્પમાલા ચ ભીષણી વનમાલિની ।
અનન્તશયનાઽનન્યા નરનારાયણોદ્ભવા ॥ ૯૨॥

નૃસિંહી દૈત્યમથની શઙ્ખચક્રગદાધરા ।
સંકર્ષણસમુત્પત્તિરમ્બિકાપાદસંશ્રયા ॥ ૯૩॥

મહાજ્વાલા મહામૂર્તિઃ સુમૂર્તિઃ સર્વકામધુક્ ।
સુપ્રભા સુસ્તના ગૌરી ધર્મકામાર્થમોક્ષદા ॥ ૯૪॥

ભ્રૂમધ્યનિલયા પૂર્વા પુરાણપુરુષારણિઃ ।
મહાવિભૂતિદા મધ્યા સરોજનયના સમા ॥ ૯૫॥

અષ્ટાદશભુજાઽનાદ્યા નીલોત્પલદલપ્રભા ।
સર્વશક્ત્યાસનારૂઢા ધર્માધર્માર્થવર્જિતા ॥ ૯૬॥

વૈરાગ્યજ્ઞાનનિરતા નિરાલોકા નિરિન્દ્રિયા ।
વિચિત્રગહનાધારા શાશ્વતસ્થાનવાસિની ॥ ૯૭॥

સ્થાનેશ્વરી નિરાનન્દા ત્રિશૂલવરધારિણી ।
અશેષદેવતામૂર્તિર્દેવતા વરદેવતા ।
ગણામ્બિકા ગિરેઃ પુત્રી નિશુમ્ભવિનિપાતિની ॥ ૯૮॥

અવર્ણા વર્ણરહિતા નિવર્ણા બીજસંભવા ।
અનન્તવર્ણાઽનન્યસ્થા શંકરી શાન્તમાનસા ॥ ૯૯॥

અગોત્રા ગોમતી ગોપ્ત્રી ગુહ્યરૂપા ગુણોત્તરા ।
ગૌર્ગીર્ગવ્યપ્રિયા ગૌણી ગણેશ્વરનમસ્કૃતા ॥ ૧૦૦॥

સત્યમાત્રા સત્યસંધા ત્રિસંધ્યા સંધિવર્જિતા ।
સર્વવાદાશ્રયા સંખ્યા સાંખ્યયોગસમુદ્ભવા ॥ ૧૦૧॥

અસંખ્યેયાઽપ્રમેયાખ્યા શૂન્યા શુદ્ધકુલોદ્ભવા ।
બિન્દુનાદસમુત્પત્તિઃ શંભુવામા શશિપ્રભા ॥ ૧૦૨॥

વિસઙ્ગા ભેદરહિતા મનોજ્ઞા મધુસૂદની ।
મહાશ્રીઃ શ્રીસમુત્પત્તિસ્તમઃપારે પ્રતિષ્ઠિતા ॥ ૧૦૩॥

ત્રિતત્ત્વમાતા ત્રિવિધા સુસૂક્ષ્મપદસંશ્રયા ।
શાન્ત્યતીતા મલાતીતા નિર્વિકારા નિરાશ્રયા ॥ ૧૦૪॥

શિવાખ્યા ચિત્તનિલયા શિવજ્ઞાનસ્વરૂપિણી ।
દૈત્યદાનવનિર્માત્રી કાશ્યપી કાલકલ્પિકા ॥ ૧૦૫॥

શાસ્ત્રયોનિઃ ક્રિયામૂર્તિશ્ચતુર્વર્ગપ્રદર્શિકા ।
નારાયણી નરોદ્ભૂતિઃ કૌમુદી લિઙ્ગધારિણી ॥ ૧૦૬॥

કામુકી લલિતા ભાવા પરાપરવિભૂતિદા ।
પરાન્તજાતમહિમા બડવા વામલોચના ॥ ૧૦૭॥

સુભદ્રા દેવકી સીતા વેદવેદાઙ્ગપારગા ।
મનસ્વિની મન્યુમાતા મહામન્યુસમુદ્ભવા ॥ ૧૦૮॥

અમૃત્યુરમૃતા સ્વાહા પુરુહૂતા પુરુષ્ટુતા ।
અશોચ્યા ભિન્નવિષયા હિરણ્યરજતપ્રિયા ॥ ૧૦૯॥

હિરણ્યા રાજતી હૈમી હેમાભરણભૂષિતા ।
વિભ્રાજમાના દુર્જ્ઞેયા જ્યોતિષ્ટોમફલપ્રદા ॥ ૧૧૦॥

મહાનિદ્રાસમુદ્ભૂતિરનિદ્રા સત્યદેવતા ।
દીર્ઘા કકુદ્મિની હૃદ્યા શાન્તિદા શાન્તિવર્ધિની ॥ ૧૧૧॥

લક્ષ્મ્યાદિશક્તિજનની શક્તિચક્રપ્રવર્તિકા ।
ત્રિશક્તિજનની જન્યા ષડૂર્મિપરિવર્જિતા ॥ ૧૧૨॥

સુધામા કર્મકરણી યુગાન્તદહનાત્મિકા ।
સંકર્ષણી જગદ્ધાત્રી કામયોનિઃ કિરીટિની ॥ ૧૧૩॥

ઐન્દ્રી ત્રૈલોક્યનમિતા વૈષ્ણવી પરમેશ્વરી ।
પ્રદ્યુમ્નદયિતા દાન્તા યુગ્મદૃષ્ટિસ્ત્રિલોચના ॥ ૧૧૪॥

મદોત્કટા હંસગતિઃ પ્રચણ્ડા ચણ્ડવિક્રમા ।
વૃષાવેશા વિયન્માતા વિન્ધ્યપર્વતવાસિની ॥ ૧૧૫॥

હિમવન્મેરુનિલયા કૈલાસગિરિવાસિની ।
ચાણૂરહન્તૃતનયા નીતિજ્ઞા કામરૂપિણી ॥ ૧૧૬॥

વેદવિદ્યાવ્રતસ્નાતા ધર્મશીલાઽનિલાશના ।

વીરભદ્રપ્રિયા વીરા મહાકાલસમુદ્ભવા ॥ ૧૧૭॥

વિદ્યાધરપ્રિયા સિદ્ધા વિદ્યાધરનિરાકૃતિઃ ।
આપ્યાયની હરન્તી ચ પાવની પોષણી ખિલા ॥ ૧૧૮॥

માતૃકા મન્મથોદ્ભૂતા વારિજા વાહનપ્રિયા ।
કરીષિણી સુધાવાણી વીણાવાદનતત્પરા ॥ ૧૧૯॥

સેવિતા સેવિકા સેવ્યા સિનીવાલી ગુરુત્મતી ।
અરુન્ધતી હિરણ્યાક્ષી મૃગાઙ્કા માનદાયિની ॥ ૧૨૦॥

વસુપ્રદા વસુમતી વસોર્ધારા વસુંધરા ।
ધરાધરા વરારોહા વરાવરસહસ્રદા ॥ ૧૨૧॥

શ્રીફલા શ્રીમતી શ્રીશા શ્રીનિવાસા શિવપ્રિયા ।
શ્રીધરા શ્રીકરી કલ્યા શ્રીધરાર્ધશરીરિણી ॥ ૧૨૨॥

અનન્તદૃષ્ટિરક્ષુદ્રા ધાત્રીશા ધનદપ્રિયા ।
નિહન્ત્રી દૈત્યસઙ્ઘાનાં સિંહિકા સિંહવાહના ॥ ૧૨૩॥

સુષેણા ચન્દ્રનિલયા સુકીર્તિશ્છિન્નસંશયા ।
રસજ્ઞા રસદા રામા લેલિહાનાઽમૃતસ્રવા ॥ ૧૨૪॥

નિત્યોદિતા સ્વયંજ્યોતિરુત્સુકા મૃતજીવની ।
વજ્રદણ્ડા વજ્રજિહ્વા વૈદેહી વજ્રવિગ્રહા ॥ ૧૨૫॥

મઙ્ગલ્યા મઙ્ગલા માલા મલિના મલહારિણી ।
ગાન્ધર્વી ગારુડી ચાન્દ્રી કમ્બલાશ્વતરપ્રિયા ॥ ૧૨૬॥

સૌદામિની જનાનન્દા ભ્રુકુટીકુટિલાનના ।
કર્ણિકારકરા કક્ષ્યા કંસપ્રાણાપહારિણી ॥ ૧૨૭॥

યુગંધરા યુગાવર્ત્તા ત્રિસંધ્યા હર્ષવર્ધની ।
પ્રત્યક્ષદેવતા દિવ્યા દિવ્યગન્ધા દિવાપરા ॥ ૧૨૮॥

શક્રાસનગતા શાક્રી સાધ્વી નારી શવાસના ।
ઇષ્ટા વિશિષ્ટા શિષ્ટેષ્ટા શિષ્ટાશિષ્ટપ્રપૂજિતા ॥ ૧૨૯॥

શતરૂપા શતાવર્ત્તા વિનતા સુરભિઃ સુરા ।
સુરેન્દ્રમાતા સુદ્યુમ્ના સુષુમ્ના સૂર્યસંસ્થિતા ॥ ૧૩૦॥

સમીક્ષ્યા સત્પ્રતિષ્ઠા ચ નિવૃત્તિર્જ્ઞાનપારગા ।
ધર્મશાસ્ત્રાર્થકુશલા ધર્મજ્ઞા ધર્મવાહના ॥ ૧૩૧॥

ધર્માધર્મવિનિર્માત્રી ધાર્મિકાણાં શિવપ્રદા ।
ધર્મશક્તિર્ધર્મમયી વિધર્મા વિશ્વધર્મિણી ॥ ૧૩૨॥

ધર્માન્તરા ધર્મમેધા ધર્મપૂર્વા ધનાવહા ।
ધર્મોપદેષ્ટ્રી ધર્માત્મા ધર્મગમ્યા ધરાધરા ॥ ૧૩૩॥

કાપાલીશા કલામૂર્તિઃ કલાકલિતવિગ્રહા ।
સર્વશક્તિવિનિર્મુક્તા સર્વશક્ત્યાશ્રયાશ્રયા ॥ ૧૩૪॥

સર્વા સર્વેશ્વરી સૂક્ષ્મા સુસૂક્ષ્મા જ્ઞાનરૂપિણી ।
પ્રધાનપુરુષેશેશા મહાદેવૈકસાક્ષિણી ।
સદાશિવા વિયન્મૂર્તિર્વિશ્વમૂર્તિરમૂર્તિકા ॥ ૧૩૫॥

એવં નામ્નાં સહસ્રેણ સ્તુત્વાઽસૌ હિમવાન્ ગિરિઃ ।
ભૂયઃ પ્રણમ્ય ભીતાત્મા પ્રોવાચેદં કૃતાઞ્જલિઃ ॥ ૧॥

યદેતદૈશ્વરં રૂપં ઘોરં તે પરમેશ્વરિ ।
ભીતોઽસ્મિ સામ્પ્રતં દૃષ્ટ્વા રૂપમન્યત્ પ્રદર્શય ॥ ૨॥

એવમુક્તાઽથ સા દેવી તેન શૈલેન પાર્વતી ।
સંહૃત્ય દર્શયામાસ સ્વરૂપમપરં પુનઃ ॥ ૩॥

નીલોત્પલદલપ્રખ્યં નીલોત્પલસુગન્ધિકમ્ ।
દ્વિનેત્રં દ્વિભુજં સૌમ્યં નીલાલકવિભૂષિતમ્ ॥ ૪॥

રક્તપાદામ્બુજતલં સુરક્તકરપલ્લવમ્ ।
શ્રીમદ્ વિશાલસંવૃત્તલલાટતિલકોજ્જ્વલમ્ ॥ ૫॥

ભૂષિતં ચારુસર્વાઙ્ગં ભૂષણૈરતિકોમલમ્ ।
દધાનમુરસા માલાં વિશાલાં હેમનિર્મિતામ્ ॥ ૬॥

ઈષત્સ્મિતં સુબિમ્બોષ્ઠં નૂપુરારાવસંયુતમ્ ।
પ્રસન્નવદનં દિવ્યમનન્તમહિમાસ્પદમ્ ॥ ૭॥

તદીદૃશં સમાલોક્ય સ્વરૂપં શૈલસત્તમઃ ।
ભીતિં સંત્યજ્ય હૃષ્ટાત્મા બભાષે પરમેશ્વરીમ્ ॥ ૮॥

॥ ઇતિ શ્રીકૂર્મપુરાણે પાર્વતી સહસ્રનામ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Different texts have different numbering scheme.
For example Kurmapurana 1,12.46-12.207 (Hindi)
or 1,11.61-11.218 (English, Wiki)

Encoded and proofread by Kirk Wortman kirkwort@hotmail.com

---

*Shri Parvati Sahasranama Stotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*